## ।। अथ सप्तविंशोऽध्याय: ।। Chapter-27

वसिष्ठ उवाच :- भरद्वाजाश्रमं गच्छेत्सर्वपापप्रणाशनम् ।।
बन्धूदेवीति विख्याता यत्रास्ति भुवनेश्वरी ।। १

यां दृष्ट्वा मानवो भक्त्या भारद्वाजाश्रमे नृप ।
आत्मनो बन्धुहीनत्वं न कदाचन पश्यति ।। २

कैतकीश्रवणाज्जाता श्रवन्ती नाम या नदी ।।
यत्र पादपमूलानि मुनिकन्यैव सिञ्चति ।।[१] ३

राजोवाच :- भरद्वाजाश्रमे तत्र बन्धूदेवी यथाभवत् ।।
तथा कथय मे सर्वं यद्यस्ति करुणा मयि ।। ४

वसिष्ठ उवाच :- पुरासीत्पृथिवीपाल श्रीमाले शुभलक्षण : ।।
ब्राह्मण: कुण्डपा नाम कामशास्त्रविचक्षण : ।। ५

दैवतातिथिभृत्यानांच बन्धूनां च दिवानिशम् ।।
करोति विविधां पूजां भोजनाच्छादनादिभि: ।। ६

----

१ ~~श्लोक स्थित स्रवणाज्जाता~~, ~~स्रवन्तीत्यादि वन्त्य~~

सत्वमुचितम्

क- सी ई कन्या वसिंचति

घ्यं

अथातिथ्यपरस्यास्य कुण्डपो गृहमेधिन: ।।
मन्त्रौषधिविधानज्ञो द्विज: कश्चिदुपाययौ ।। ७

स तेनाभ्यर्थितो राजन् भोजनाय महामना: ।।
शुचि: स्नात्वा पितॄन् देवांस्तर्पयित्वा यथाविधि ।। ८

तं द्विजं भोजयामास कुण्डपा: शाकविस्तरै: ।।
देशान्तरविहारी स भुक्त्वान्नं मिष्टमुत्तमम् ।। ९
इदमाह मुदायुक्त: शर्णे विश्रम्य कुण्डपां ।। ६

द्विज उवाच :- तुष्टस्तवानया भक्त्या विधिपूर्वं द्विजोत्तम ।।
गन्तुकामोऽस्मि तद ब्रूहि किं करोमि प्रियं तव ।। ११

कुण्डपोवाच :- श्रुतमस्ति मया पूर्वं विप्र सिद्धात् कुतश्चन ।।
अस्ति सौगन्धिकस्याद्रे: पूर्वस्यां विवरो महान् ।। १२

गम्यते तस्य मार्गेण नागलोकं प्रति ध्रुवं ।।
तत्रार्ध्वपथ स्यास्ति कुट्टिमं हेमनिर्मितं ।। १३

------

१ वी शाक ई पौशाक (ए १) मृष्टमुत्तमय

सी डी इ विप्र: सिद्धो स्ति कश्चन

युक्तं विद्रुमसोपानैर्व्योममौल्लेखि शिरोगृहम् ।।
हंसपारावतैर्जुष्टं मत्तकोकिलनादितम् ।। १४

सारिकाशुकसंलापैः सर्वतो दत्तकौतुकम् ।। १५
तस्मिन्निष्णुमती नाम नागकन्या मनोरमा ।।
रूपेणाप्रतिमा लोकैरतिः साक्षादिव स्थिता ।। १६

निजानुरूपं पुरुषं चिन्तयन्ती वरांगना ।
अध्यास्ते तद्गृहं रम्यं सखीभिरभिसेविता ।। १७

लीला नाम सखी तस्याः सदा प्रीतिविवर्द्धनी ।।
विवरद्वारमासाद्य नित्यं ब्रूते निशामुखे ।। १८

अस्ति विद्याकलापज्ञः कश्चिदस्मिन्महीतले ।।
कथयेथः सखीप्रश्नं स च तां कामयेदिति ।। १९

ततो नानादिगन्तेभ्यः तत्रागत्य कलाविदः ।।
लीलया नीयमानास्तु सखीहेतोर्बिलं प्रति ।। २०

लोचनाभ्यामपश्यन्तो बहिरेव निराकृताः ।।
अहमप्येकवेलं हि लिप्सुस्तां नागकन्यकाम् ।।
प्रविष्टो लीलया सार्द्धमन्धीभूतो बहिष्कृतः ।। २१

तदत्र यदि जानासि मन्त्रं वा द्विज भैषजम् ।।
तदाचक्ष्व समस्तं वै येन तत्र व्रजाम्यहम् ।। २२

द्विजउवाच :- अस्त्युपायो मया दृष्टस्तस्मिन्विवरदर्शने ।।
सुप्रभावमनास्थेयमन्यस्याञ्जनमुत्तमम् ।। २३

ब्रैहन् येनाञ्जिते नेत्रे सर्वं तमसि पश्यति ।।
गतास्तत्र न पश्यन्ति सर्वे ये त्वकलाविदः ।। २४

सहेतुर्नागकन्याया मनुष्यादर्शनं खलु ।। २५

------

सी- के मुहुः ई मुहाः ( ए १) दीगन्तेभ्य :

तदहं ते प्रदास्यामि दिव्यमञ्जनमुत्तमम् ।।
तस्मादवहितो विप्र स्नानं कृत्वा शुचिर्भव ।। २६

बसिष्ठ उवाच :- तच्छ्रुत्वा स द्विजो राजन्कुण्डपा ह्यतिथिर्वच: ।।
तत: स्नात्वा शुचिर्भूत्वा तस्याग्रे समुपाविशत् ।। २७

उदाघाट्य नलिकामेकां स द्विजोऽ[1]न्त्रवित्तम : ।।
नखमात्रं सुदु:प्राप्यं तस्मै प्रादिशदञ्जनं ।। २८

अथकुण्डपमामन्त्र्य चिरात्प्राप्तमनोरथम् ।।
प्रक्षिप्य नलिकां कुक्षौ स जगाम यथासुखं ।। २९

कुण्डपोऽप्यथ भूपाल तस्मिन्नेव शुभेऽहनि ।।
ययौ सौगंधिकं शैलं यत्रास्ते बिवरो महान् ।। ३०

कृतालंकरण: श्रीमान् चारुचन्दनचर्च्चित: ।।
गन्धाढ्यां स्त्रजमाबिभ्रत्तस्थौ तत्र निशामुखे ।। ३१

----

१ सी- क, डी, ई- सत्तम :

तत: परिमलोद्गारी बिला त्प्रावर्त्तानिल: ।।
लीला तदनु लीलाक्षी प्रादुर्भूता बचोऽब्रवीत् ।। ३२

लीलोवाच :- अस्ति विद्याकलापज्ञ: कश्चिदस्मिन्महीतलै ।।
कथयैव: सखीप्रश्नं स च तां कामयैदिति ।। ३३

कृष्ड्या उवाच :- अहमस्मि विशालाक्षि द्विज: श्रीमालसंश्रय: ।।
कथयिष्ये सखीप्रश्नं कामयिष्यामि तामथ ।। ३४

वसिष्ठ उवाच :- तत: स्मितमुखी लीला लीलाक्षी हंसगामिनी ।।
तं धृत्वा दक्षिणे पाणौ प्रविवेश रसातलं ।। ३५

गच्छन्नैव द्विजो विज्ञानञ्जनाञ्जितलोचन :।।
सर्वं सुव्यक्तमद्राक्षीत् पाणावामलकं यथा ।। ३६

तमापतन्तं विज्ञाय द्विजेन्द्रं लीलया सह ।।
प्रत्युत्थानधिया सम्भूरभ्यगाद्रचिताञ्जलि: ।। ३७

-----

१ बी ई - प्रादुर्भूता ब्रवीद् बच :

२ बी साचतं कामयैदिति

३ बी संश्रित:

४ बी ई राजेन्द्र

५ बी प्रत्युत्थानविधं सम्भूरभ्यगच्छत् कृताञ्जलि:

सा दृष्ट्वा सर्वतो दृष्टिं चारयन्तं द्विजोत्तमं ।।
विस्मिताभून्महीपाल हर्षादिदमवोचत ।। ३८

इष्णुमत्युवाच :- स्वागतं ते द्विजश्रेष्ठ सर्वविद्याविशारद ।।
इदं सौधमिमाः सख्यस्तव सर्वं न संशयः ।। ३६

वसिष्ठ उवाच :- श्राव्यमाणः स मधुरमितिवाक्यं सुमध्यया ।।
सदनं प्राविशत्तस्या विन्ध्याद्रिमिव कुञ्जरः ।। ४०

ददृशे नागकन्यायास्तेन सख्यो मदालसाः ।।
मौलौ फणिधराः सर्वाश्चारुकोटीरकुण्डलाः ।। ४१

तप्तकाञ्चनगौराङ्ग्यो महामणिविभूषिताः ।।
नानालङ्कृतिशोभाढ्याः स्मरस्यापि मनोहराः ।। ४२

पीवरोच्चकुचाभोगविस्फुरन्त्यो मणिस्रजः ।।
सुमेरुशिखरोत्सर्गे गंगधारा इवाबभुः ।। ४३

---

१वी ई सर्वशास्त्र
२ सी डी ई- महालसा
३ ई बीत गंगाधारा

( ए१) तो
( ए२) सर्वा
( ए३) धा
( ए४) श्राव्यमाणः

तामिरभ्यर्च्यमानौऽसौ चारुसोपान पद्धतिम् ।।
आरुह्य मणिमयं पीठं कुट्टिमे समुपाविशत् ।। ४४

दिव्यगन्धोदकस्नानैः दिव्यगन्धानुलेपनैः ।।
दिव्यालंकृतवासोभिस्ताभिः सम्भूषितो द्विजः ।। ४५

अनंगतरलापांगी लीलाललितलोचना ।।
तमुवाच द्विजश्रेष्ठं राजनिष्णुमती वचः ।। ४६

इष्णुमत्युवाच :- दर्शनीया युवानोऽत्र ब्राह्मणाः क्षत्रिया विशः ।।
मदर्थं शतशः प्राप्ता न ते लेभे समीहितम् ।। ४७

ब्राह्मण उवाच :- प्रश्नस्तव चकोराक्षि न यैर्बुधैर्विरै नरैः ।।
त्वदवाप्तिः कथं तेषां स्यात् शूद्रस्य श्रुतेरिव ।। ४८

इष्णुमत्युवाच :- निष्क्रान्ताः सर्वविद्यासु सर्वमर्हन्ति हि द्विजाः ।।
अतस्त्वमुच्यसे विद्वान्प्राप्नुमेनं सुदुर्लभम् ।। ४९

---

१ बी लुलित
२ ए अत्र श्लोके प्रश्नास्तैश्चकोराक्षि इत्येव साधु स्यात्
३ बी ई सुदुर्मिदम्

ब्राह्मण उवाच :- सुभगे त्वं कलाग्रामं सकलं वेत्सि तत्त्वत: ।।
ब्रूहि प्रश्नं यथाभीष्टं[१] प्रवक्ष्यामि यथामति : ।। ५०

इष्टुमत्युवाच :- चामीकरमिदं लोके देहिनां गात्रभूषणं ।।
कथमुत्पद्यते विप्र तन्मे ब्रूहि बुधोऽसि चेत्[२] ।। ५१

ब्राह्मण उवाच :- देवानां वैनतेयेन पुरा पीयूषहेतवे ।।
किल रौद्रममूद्युद्धं घोरैः शिखरसीमनि ।। ५२

तदा-चञ्चुपुटाघातैः कद्रुभिः फणिविद्विष:[३] ।।
आर्तान् दिवौकसो वीक्ष्य मुमोच कुलिशं हरि: ।। ५३

वामपक्षे पपातास्य वज्रं तद्गिरिदारणम् ।।
तेनैकं पिच्छमादीप्तं गगनाद्गलितं भुवि ।। ५४

तेन चामीकरं जातं सर्वस्याप्यंगभूषणम् ।।
पुनर्ब्रूहि सरोजाक्षि यत्ते मनसि दुर्विदम् ।। ५५

------

१ सी क ई मया
२ बुधो सिवे ई बुधोसिते
३ बी ई तदाचञ्चुपुटाघातैस्तीक्ष्णैः फणिभिर्विद्विष :
इत्यास्ते पाठः । यदि तीक्ष्णैः फणिगणाद्विष इति
परिवर्त्येत चेत साधुस्यात्

वसिष्ठ उवाच :- इत्याकर्ण्य द्विजेन्द्रस्य प्रश्नस्योत्तरमीप्सितम् ।।
विस्मितेषुमती बाला भूय: प्रष्टुंसमुद्यता ।। ५६

विवदयन्तीमथो वीक्ष्य सखीं विस्फुरिताधराम् ।।
पतियोगे वयस्याया लुब्धा लीलेदमब्रवीत् ।। ५७

लीलोवाच :- मातिशयीष्ट वामोरु द्विजमेनं कलाविदं ।।
पतित्वे वृणु पर्यस्ता यत: कुप्यन्ति वै द्विजा ।। ५८

वसिष्ठ उवाच :- इत्युक्तवत्यां लीलायां हर्षादिषुमती नृप ।
पूर्णाभिप्रितमनोभावा बहुन मेने सखीवच[1]: ।। ५९

मनोऽभिलषिते[2] पुंसां स्त्रीणां[3] लज्जाजडं मन: ।।
सखीवचन-सापेक्षं सर्वथैव प्रवर्तते ।। ६०

समकालममूत्तस्या: स्वेद: स्तम्भोऽथ वेपथु : ।।
राजन् सर्वेषु गात्रेषु ततो लीलाब्रवीद्द्विजम् ।। ६१

----

१ बी पतियोगं वयस्याया लब्ध्वा ई लब्धलीले
२ बी ब्रवीदियम्, ई राजस्यफणानुत: राजन सर्वेषुगात्रेषुत तोल्को ला ब्रवीद्विजं
१ ए सखविच:
२ ए लिखिते
(३ ए) स्त्रिणां

लीलोवाच :- इयं प्रियसखी कन्या कंकोलस्य फणाभृत: ।।
आत्मानं प्रददौ तुभ्यं प्रक्षाल्य स्वेदवारिभि: ।। ६२

वसिष्ठ उवाच :- इत्युक्त: कुण्डपा विप्रो गृहीत्वा दक्षिणं करम् ।।
गान्धर्वेण विवाहेन तदुद्वाहविधिर्व्यधात् ।। ६३

सखीपरिवृतां बालां नागकन्यां मनोरमाम् ।।
नित्यं मनोऽनुकूलाभि: क्रीडाभि: स उपाचरत्[1] ।। ६४

अनुरागपरं चेतस्तस्यास्तस्मिन् द्विजोत्तमे ।।
प्रावर्तत[2] महीपाल राग: शुक्लपटे यथा ।। ६५

आहूतैर्मुनिकन्याभि:[3] भोगैर्बहुभिरन्वहम् ।।
प्रीयमाणो द्विजो वेत्ति न कालस्यात्ययो महान् ।। ६६

अथ सस्मार बन्धूनां पुत्राणां सुहृदां तथा ।।
कदाचिदुपविष्टोऽसौ कुण्डपा द्विजसत्तम: ।। ६७

-----

१ बी ई समुपाचरत्     (ए ३) आहृतै
२ बी ई प्रवर्तते

ततो बाष्पाकुले नेत्रे वीक्ष्य तस्य प्रियस्य वै ॥
दुःखादिग्नमती कान्तमेकान्ते प्रत्युवाचह ॥ ६८

इष्णमत्युवाच :- किमर्थं प्राणनाथस्य नेत्रयोरश्रुबिन्दव: ॥
निरीक्ष्यन्ते मया कस्माद्वर्षयन्तो मनोज्ज्व ॥ ६९

इमा: सख्यो मम प्राणा: सौधं चैतन् मनोरमम् ॥
तव सर्वं द्विजश्रेष्ठ ब्रूहि दु:खनिबन्धनम् ॥ ७०

ब्राह्मण उवाच :- रम्यांके रममाणस्य त्वया सह चिरं मम ॥
प्रवृत्तिर्जातु बन्धूनां न याति श्रुतिगोचरे ॥ ७१

गन्तुमिच्छामि तदहं श्रीमालं देववत्सलम् ॥
त्वया सह विशालाक्षि स्वजनोत्कण्ठया द्रुतम् ॥ ७२

नागकन्योवाच :- एतावदेव कुरुते हृदि शोक: परं तव ॥
श्रीमालमागमिष्यामि श्वान् ब्रजतु माचिरम् ॥ ७३

----

१बी ई प्रवृति र्जातिबन्धूनां (ए१) सहा
२ सी डी ई परन्तप, ई परन्तप: (ए२) बन्धुनां

वसिष्ठ उवाच :- इत्युक्त: स मुदायुक्त: प्रियया नागकन्यया ।।
औषधालिप्तचरणो विवराद्गन्तुमुद्यत: ।। ७४

अथ लीलाप्रभृतय: सख्यो बाष्पाविलेक्षणा: ।।
मुहुर्मुहु: परिष्वज्य सखीमूचु: सगद्गदम् ।। ७५

सख्य ऊचु : शिवास्ते सन्तु पन्थान: सखि सार्द्धं द्विजन्मना ।।
स्मर्तव्या वयमन्हाय त्वं हि नो जीवितेश्वरी ।। ७६

वसिष्ठ उवाच :- इत्युक्ता साश्रुवदना कृच्छ्रात् कर्कोलकन्यका ।।
सखी:[1] प्रतिनिवृत्याशु निर्ययौ विवराद्बहि: ।। ७७

सौगन्धिकं गिरिं[2] पृष्ठे कृत्वा स कुण्डपो द्विज : ।।
भरद्वाजाश्रमं प्राप्त: स्रवन्ती यत्र सा नदी ।। ७८

अध्युवास निशामेकामभिष्टमत्यान्वितो नृप ।।
ततस्तस्य शयानस्य निद्रापहृतचेतस: ।। ७९

-----

बी ई सखीं प्रतिनिवृत्याशु
२ सी डी ई गिरे :

बाला बन्धुवियोगार्त्ताऽपि निशीथे दुःखिताऽभवत् ॥
चिन्तयामास कृत्वाऽस्मपहाय सुखीजनं ॥ ८०

आगता मर्त्यलोकेऽस्मिन्सहानेन द्विजन्मना ॥ ८१

बिना मां प्रियसख्यस्ता लीलाप्रभृतयो बत ॥
न धृतिं कामभोगेषु लप्स्यन्ते शोकमानसाः ॥ ८२

अहो बत महद्दुःखं वयस्याविरहो महान् ॥
यदयं मामनुप्राप्य मथ्नाति[1] गुडकाण्डवत् ॥ ८३

इति चिन्तयमाना सा निद्राव्यवहिते प्रिये ॥
रुदती[2] स्वजनं बाला कुररीवेदमब्रवीत् ॥ ८४

न बन्धुरिह मे नित्यं नरलोकेऽस्ति कश्चन[4] ॥
बन्धुवर्गविहीनायास्तत्कथं सुखमस्तु[3] मे ॥ ८५

बान्धवास्त्राणमार्त्तानां बान्धवाः परमा गतिः ॥
न बान्धवविहीनानां सुखं स्वर्गेऽपि विद्यते ॥ ८६

----

१ ई क- सी ततः
२ बी शोक लालसाः ई शाक लोलसा (ए १) मन्थाति
३ क- सी डी- मश्नुते (ए २) रुदन्ती
४ क-ई- सी १ विहीनासु

-----

मुहुर्मुहुरिदं वाक्यं जल्पन्ती साश्रुलोचना ॥
पर्यटद्विपिने रात्रौ कंकोलकुलनन्दिनी ॥ ८७

तदा चतुर्दशी राजन्मासस्याश्वयुजस्य च ॥
लोके भ्रमति भक्तेभ्यो देवी बलिजिघृक्षया ॥ ८८

तस्या विलपितं श्रुत्वा सुदृशः करुणं बहु ॥
कृपया परया देवी प्रत्यक्षा भून्महेश्वरी ॥ ८९

विमानवरमारूढा दिव्यमालानुलेपना ॥
चामरैर्वीज्यमाना च परितोऽप्सरसां गणैः ॥ ९०

तेजोभिस्तिमिरस्तोममुत्क्षिपन्ती महानिशि ॥
बद्धकोटीरशोभाढ्या[१] कुण्डलांगदधारिणी ॥ ९१

स्रजं मणिमयीं कण्ठे दधाना चारुहासिनी ॥
आकाशादाश्रमं प्राप्य नागकन्यामुवाच ताम् ॥ ९२

---

१ ए शोभाढ्या

देव्युवाच :- किमर्थं खिद्यसे भीरु कङ्कोलकुलबालिके ।।
अहं ते बन्धुहीनाया बन्धुरस्मि शुचिस्मिते ।। ६३

न भीः कार्या त्वया वत्से क्रीडन्त्या प्रेयसा सह ।।
यत्ते सर्वं हितं सुभ्रु तत्प्रदास्यामि मा शुचः ।। ६४

वसिष्ठ उवाच :- इत्यकस्मादुपान्तेऽसौ व्योम्नः प्राप्तां सुरेश्वरीं ।।
आत्मनः पुरतो वीक्ष्य विस्मितेदमथाब्रवीत् ।। ६५

इष्टमत्युवाच :- यदि मे बन्धुहीनाया बन्धुर्भवसि भूतले ।।
करोतु जगतां माता तदिहैवात्मनः स्थितिम् ।। ६६

देव्युवाच :- स्थास्यामीह त्वहं नूनमद्य प्रभृति सुन्दरि ।।
प्रपन्नानामहोरात्रं पूरयन्ती मनोरथान् ।। ६७

यदुक्तं बन्धुरस्मीति पुरस्ते परितुष्टया ।।
तेनाहं बन्धुदेवीति भविनी विश्रुता भुवि ।। ६८

दास्यामि बन्धुहीनेभ्यो बन्धून्परमशोभनान् ।।
वन्ध्यानां पुत्रदा नित्यं दरिद्राणां च वित्तदा ।।
निवत्स्यामि तव प्रीत्यै सदा श्रीमालसीमनि ।। ९९

इहेमामर्चयिष्यन्ति श्रद्धानाश्च ये नरा: ।।
पुष्पैर्धूपैः सुगन्धाद्यैर्न तेषामापदः क्वचित् ।। १००

वसिष्ठ उवाच :- एतस्मिन्नन्तरे राजन् प्रबुध्दः कुण्डपा द्विजः ।।
सुधाप्रक्षालितमिव ददर्शाश्रममण्डलं ।। १०१

स तां चैष्णुमतिं बालां देवीं च वरदां पुर: ।।
उत्थाय विस्मितो विप्रो बद्धाञ्जलिपुटस्तदा ।। १०२

लुलोठ जगतीपीठे स्तुवंस्तां विश्वमातरम् ।। १०३

देव्युवाच :- वरं वरय भद्रं ते सर्वशास्त्रविशारद ।।
यस्त्रैलोक्यमनोहारि स्त्री रत्नमिदमानयत् ।। १०४

----

१ ए सुगन्धाढ्यै

ब्राह्मण उवाच :- ये मातरिदमाख्यानमिष्टमत्यागतामुदर्वम् ।।
श्रृण्वन्ति सततं तेषां प्रियायोग: सदास्तु वै ।। १०५

देव्युवाच :- एवमस्तु महाप्राज्ञ तेऽभिलषितं द्विज ।।
प्रीतये तव कान्ताया: स्थितां जानीहि मामिह ।। १०६

वसिष्ठ उवाच :- इत्युक्त्वान्तदधे देवी स्थित्वा तत्रांशतो नृप ।।
ब्राह्मणोऽप्युदिते सूर्ये प्रियायुक्तो गृहं ययौ ।। १०७

इत्थमासी न्महीपाल भरद्वाजाश्रमे तदा ।।
बन्धुदेवी प्रपन्नानां वाञ्छितार्थप्रदायिनी ।। १०८

अष्टम्यां च नवम्यांच चतुर्दश्यां च वै निशि ।।
सहाप्सरोभि: क्रीडन्ती दृश्यते चापि बान्धवी ।। १०९

वसिष्ठ उवाच :- श्रूयते नूपुरारा[1]व: कलगितध्वनिस्तदा ।।
दिव्यामोदश्च राजेन्द्र समुल्लसति सर्वत: ।। ११०

------

१ - क- सी ई - गर्भोदभवम्

(ए-१) नूपुराव:

इदं ते कथितं सर्वं बन्धुदेवी समुद्भवम् ।।
यः शृणोति नरो भक्त्या तस्य श्रीः सर्वतोमुखी ।। १११

------

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां
ब्राह्म्य विभागे पुष्करपरिच्छेदे श्रीमालमाहात्म्ये बन्धु-देवी-
-माहात्म्यं नामसप्तविंशोऽध्यायः ।। २७

-o-